# Kailasaprasadavarnanam Shivarahasyantargatam

# કૈલાસપ્રાસાદવર્ણનમ્ શિવરહસ્યાન્તર્ગતમ્

## Document Information

Text title : Kailasaprasadavarnanam Shivarahasyantargatam

File name : kailAsaprAsAdavarNanamshivarahasyAntargatam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 17 - kailAsaprAsAdavarNanam | 43-74||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# કૈલાસપ્રાસાદવર્ણનમ્ શિવરહસ્યાન્તર્ગતમ્

- સ્કન્દપ્રોક્તમ્ શિવરહસ્યાન્તર્ગતમ્ -

મણિપ્રભાભિસ્સતતં સોમસૂર્યૌ તિરસ્કૃતૌ ।
સરસીમધ્યસઙ્ક્લૃપ્તસૌધોધદ્ધરકુમ્ભકઃ ॥ ૪૩॥

મણિસ્તમ્ભકૃતાસારભાભાસિતદિગન્તરઃ ।
સુવર્ણામ્બરસઙ્ક્લૃપ્તવિતતામલમૌક્તિકૈઃ ॥ ૪૪॥

જાલિકાપાલિકાપારવિતાનાવલિભાસુરઃ ।
તન્મધ્યહીરકોત્તુઙ્ગસિહ્માસનવરાશ્રિતઃ ॥ ૪૫॥

તત્રદેવ્યા મહાદેવો વિહારશયનાસનૈઃ ।
સરઃપ્રાન્તોરુકલશધારાસારોર્ધ્વશીકરૈઃ ॥ ૪૬॥

યન્નીરતીરગન્ધોધદ્ધારાસારૌઘશીકરૈઃ ।
કદાચિત્તત્ર મધ્યસ્થો દેવ્યા વ્યજનહસ્તયા ॥ ૪૭॥

સેવિતશ્શ્રીમહેશાનઃ ક્વચિત્પીઠસ્થિતશ્શિવઃ ।
તત્ર નાનાવિધાઃ ક્રીડા દેવ્યા ચક્રે મહેશ્વરઃ ॥ ૪૮॥

વિચિત્રાણાં ચરિત્રાણાં ત્રિણેત્રપ્રિયકામ્યયા ।
દેવ્યા પ્રમુદિતો દેવસ્તત્ર સૌધવરેષુ ચ ॥ ૪૯॥

કાશ્ચિત્તત્ર વદામ્યદ્ય શ ૃણુ ભૂસુર શામ્ભવ ।
વિપિને સરસસ્તીરે પ્રાસાદાગ્રેવ ગોપુરે ॥ ૫૦॥

વિજહાર મહાદેવો ભવાન્યા શઙ્કરસ્તદા ।
શૈલમાલોકયદ્દેવો દેવ્યા દેવી સખીગણૈઃ ॥ ૫૧॥

અદર્શયદ્વિચિત્રાણિ તસ્મિન્કૈલાસપર્વતે ॥ ૫૨॥

સાલતાલકૃતમાલતમાલૈરામલક્યવકુલાર્જુનપાટલૈઃ ।
પાનસૈલિકુચવાહ્લિકનીપૈર્દાડિમૈશ્ચ સુરસાલરસાલૈઃ ॥ ૫૩॥

જમ્બૂનિમ્બકદમ્બજૈઃ ફલભરૈસ્તક્કોલહિન્તાલકૈ-
રઙ્કોલેસ્સરલૈરશોકતિલકૈસ્તિન્દૂકમાલૂરકૈઃ ।
પુન્નાગૈર્નગનાગસર્જરસિકૈઃ ચામ્પેયમાધૂકકૈઃ
પ્લક્ષાશ્વત્થકપિત્થતિન્ત્રિણિભવૈર્ભૂનિમ્બજાલૈર્ધવૈઃ ॥ ૫૪॥

ક(વ)ટકુટજકુરણ્ઠૈઃ કર્ણિકારાશ્મમારૈઃ ખરબદરપલાશૈર્લોદ્ધ્રસચ્ચન્દનૈશ્ચ ।
કુરવકશુકતુણ્ડૈશ્શિંશુપાચેઙ્ગદીભિર્લિકુચવિકચભણ્ડઃ કેતકૈસ્મિન્દુવારૈઃ ॥ ૫૫॥

કેદારકોવિદારૈશ્ચ દેવદારુકપિત્થકૈઃ ।
તગરાગરુકૃષ્ણાભ્રૈસ્તુઙ્ગનીપકકમ્રકૈઃ ॥ ૫૬॥

મન્દારદ્વયપારિજાતવકજૈરર્કૈશ્ચ સપ્તછદૈઃ
પૂગીનારલખર્જુરૈશ્ચ કુટજૈર્નારઙ્ગજાતિદ્રુમૈઃ ।
પ્લક્ષોદુમ્બરકન્દલૈર્મુનિભવૈ રાજાદનૈર્બર્બરૈઃ
શલ્મલ્યૈર્વરશિગ્રુકૈર્મધુભવૈસ્સન્માલિઙ્ગૈરપિ ॥ ૫૭॥

ભૂતાવાસહરીતકીત્રિકટુકૈશ્શમ્યુદ્ભવૈઃ કિન્દરૈઃ
પ્રાચીનામલકૈઃ કરઞ્જકકુભૈર્ગન્ધાત્તજમ્બૂફલૈઃ ।
બન્ધૂકૈશ્ચિરિબિલ્વજૈશ્ચ તરગૈઃ કૃષ્ણાગરૂત્થૈર્દ્રુમૈઃ
માલિઙ્ગેશ્ચ શિરીષકૈઃ કુસુમિતૈરન્યૈશ્ચ શાખાશતૈઃ ॥ ૫૮॥

મલ્લીમાલતિજાતિકાસુરભિતૈસ્સાયન્તનોન્નિદ્રિતૈઃ
ચન્દ્રાસારવિકાસિતૈરતિસિતૈસ્સચ્ચન્દ્રિકાવલ્લિભિઃ ।
વલ્લીનાન્નિવહૈઃ કદમ્બજરજસ્સન્દોહગન્ધાનિલૈઃ
ઉત્ફુલ્લૈસ્તિલકૈસ્તમાલજસુમૈઃ ફુલૈર્લસત્કેસરૈઃ ॥ ૫૯॥

કુન્દૈરિન્દુકરપ્રસારિતમુખૈરાલોલસપ્તછદૈઃ
કૌસુમ્ભૈરરુણપ્રભાસુમધુરૈઃ પ્રોદ્ભૂતસત્કેસરૈઃ ।
દ્રાક્ષાગુચ્છસુવલ્લિકાસિતસિતાઃ પુણ્ડ્રેક્ષુસારાકરાઃ
પૂગદ્રુઙ્ગવલીકૃતાઙ્ગમધુરાસ્સન્નાગવલ્લીલતાઃ ॥ ૬૦॥

મન્દારસુન્દરતરુપ્રકરૈઃ પ્રફુલ્લૈરુત્ફુલ્લદાડિમસુમૈર્બકકર્ણિકારૈઃ ।
પીતાયમાનસુષમાયુતચમ્પકૈસ્તૈરુત્ફુલ્લપાટલકદમ્બજરાજવૃક્ષૈઃ ॥ ૬૧॥

સત્કિંશુકૈશ્શુકમુખૈર્વરશલ્મલીભિઃ પુન્નાગનાગનવનીપસુમૈઃ પ્રફુલ્લૈઃ ।
ભારતિભારશિખરૈઃ કલધૌતશૈલઃ પશ્યામ્બિકેઽદ્ય સુમનોહરવૃક્ષસઙ્ઘૈઃ ॥ ૬૨॥

વલ્લીવિકાસિતતનુઃ પ્રસભં ભવાનિ પ્રોદ્યત્સુધાંશુચયકોટિનિભો વિભાતિ ॥ ૬૩॥

ઉત્ફુલ્લામલપુણ્ડરીકકુમુદૈર્નીલોત્પલૈસ્સુન્દરૈઃ
આરક્તામ્બુજકઞ્જનીભિરભિતસ્મદ્રત્નસોપાનકૈઃ ।
તત્પ્રાન્તામલબિલ્વમૂલજમહાલિઙ્ગાકૃતિશ્શઙ્કરઃ
તુષ્યત્યેવ સરસ્સુરુદ્ધણપૈર્દેવ્યાગિરીન્દ્રેઽધિકમ્ ॥ ૬૩ ॥

તદ્ધ્યાનધારામૃતપાનપીનાસ્સ્વાત્મૈકતાના ઇવ ચક્રવાકાઃ ।
સરસ્સુ કલોલચલાક્તપક્ષા હંસા બકાસ્સારસપઙ્ક્તયથ ॥ ૬૪ ॥

નાર્દ્રીકૃતાઙ્ગાઃ ખલુ સઞ્ચરન્તિ ભાવા ભવાબ્ધાવિવ મે પ્રભાવાત્ ॥ ૬૫ ॥

કપિવરકુલમાદ્યચાલનાલોકનાદ્યૈઃ ફલપતનજવર્શૈઃ પુષ્પરેણપ્રકીર્ણૈઃ ।
શિખરિશિખરસારા ભૂમયશ્શોશુભન્તે કરિકટમદધારાપ્રસ્રવૈઃ પઙ્કિલાશ્ચ ॥ ૬૬ ॥

શુકબકપિકકાકકોકઘૂકૈઃ નિભૃતવિનાદિતચક્રવાકપાકૈઃ ।
ગહનવિપિનશાખિમસ્તસંસ્થામધુરારાવવિનાદિચક્રવાકૈઃ ॥ ૬૭ ॥

ગિરિવરશિખરાગ્રે નૃત્તસાટોપવબર્હાહરિકુલકૃતઘોષૈ-
ર્વૃદ્ધિતર્વારણાનાં કૈલાસપ્રાસાદવર્ણનમ્ ।
ગિરિશિરસિ નિનાદૈસ્સારસાનાં શુકાનાં
પિકરવકલકણ્ઠૈર્નાદિતસ્તદ્ગૃહાન્તઃ ॥ ૬૮ ॥

મહિષચમરકુઞ્જદન્તશૃઙ્ગૈઃ ખરખુરઘટ્ટનશૈલસાનુનિમ્નઃ ।
સુમનજગતવાયુબન્ધુરાનુમોદદ્રુમરજસઙ્કૃતિદ્રોણિલમ્બિક્ષૌદ્રઃ ॥ ૬૯ ॥

ફલકુલસુમભારદીર્ઘિતાનમ્રશાખાવ્રજ-
દલિકુલમાલાનીલનીલાબ્જતુલ્યાઃ ।
મધુરરસમુપેશીલમ્બહસ્તાગ્રશાખા
હરગિરિવરભાગા ભાન્તિ સૌવર્ણવૃક્ષાઃ ॥ ૭૦ ॥

કલધૌતનગપ્રશસ્તમુસ્તાપુલકામ્રેડિતકોલજાલમેતત્ ।
સિતદંષ્ટ્રોત્થિતઘોણઘર્ઘરોરુરાવં પશ્યમુદાગિરીન્દ્રજાતે ॥ ૭૧ ॥

હરિખરનખરૈર્વિદારિતોદ્યત્કરિકુમ્ભોદ્યત-
રક્તયુક્તમુક્તામણિજાલાવૃતભૂમિભાગમેતત્ ।
દ્વિપકુલમિદમત્યુદારઘોષં હરિણો ધાવતિ સિહ્મનાદભીતઃ ॥ ૭૨ ॥

વલ્મીકોર્ધ્વફણત્ફણીશ્વરકુલં વાતોત્થદિક્ચક્રક-
ચ્ચાર્તત્રસ્તવિલોચનં હરિરવૈર્ભીત્યા પ્રસૂતં શિશુમ્ ।
ત્યક્ત્વા ધાવતિ પશ્ય પશ્ય ગિરિજે પ્રોડ્ડીનમેણીકુલમ્ ॥ ૭૩ ॥

કૈલાસાચલરત્નસૌધગમહાસિંહાસનાદ્ધ્યાસિતો
દેવ્યુત્ફુલ્લમુખારવિન્દવિગલન્માધ્વીકસારં મધુ ।
પીત્વા લોચનષટ્પદૈર્વદતિ તાં પશ્યેતિ લિઙ્ગાન્યુમે
બિલ્વી કોમલપલ્લવૈરનુદિનકૈલાસશૃઙ્ગેઽર્ચિતમ્ ॥ ૭૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે સ્કન્દપ્રોક્તં કૈલાસપ્રાસાદવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૧૭ - કૈલાસપ્રાસાદવર્ણનમ્ । ૪૩-૭૪॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 17 - kailAsaprAsAdavarNanam . 43-74..

Notes:
Skanda સ્કન્દ describes in detail the principal abode of Śiva શિવ at Mount Kailāsa કૈલાસ પ્રાસાદ.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasaprasadavarnanam Shivarahasyantargatam*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*